॥ ईं ॐ श्रीः ॥

वैदिकं दत्तात्रेयतत्त्वम् ॥

देवरातः
अशोकावनं
गोकर्ण

१ कुमारः आत्रेयः ॥

२ अत्रिः

३ कुमारौ चान्द्रायणः आत्रेयश्च

४ कुमारः स्कन्दः कार्तिकेयः

" ईं ॐ श्रीः ॥ १

ॐ भद्रं नो अपि वातय मनः ॥

॥ वैदिकं दत्तात्रेयतत्त्वम् ॥

" कुमारः आत्रेयः ॥

॥ पूर्वपीठिका ॥

" दक्षिणे भारते श्रीक्षेत्रं गोकर्णम् "

१ "श्रीमद् भारतभूमिमण्डलपदे भागेऽपरे दक्षिणे
तीरे सत्प्रदि पश्चिमे विलसतो रत्नाकरस्याम्बुधेः ॥
गोकर्णं सुविराजते शिवकरं क्षेत्रं पवित्रं परं
तीर्थस्थानमिदं सुपावनपदं सर्वार्थसत्त्वास्पदम् ॥ १ ॥

२ "कैलासे शशिशेखरं परशिवं भक्त्या समाराधयन्
पौलस्त्यः स दशाननः सुतपसा सत् सामगानं नयन् ॥
श्रीरुद्रस्य पर प्रसाद विमलं प्राणात्मलिङ्गं नमन्
सम्प्राप प्रणिधानतः परशिवात् सर्वात्मभावात् स्तुवन्

३ " गोकर्णेऽत्र गजाननस्य हस्तकमले दत्तं समाधानतः
गोपालेन गजाननेन बटुना योगात् प्रतिष्ठानतः ॥
पौलस्त्येन "महाबलेश्वर" इति प्रख्यात नाम्ना लभौ
प्राप्तः स्वीय बलाद् अशक्त वदनो दृष्टो बभूव प्रभुः ॥ ३

॥ गोकर्णक्षेत्रोपवर्णनम् ॥

४ " गोकर्णं श्रुतिपारगैः सुपुरुषैः सद्विप्रवृन्दैः समं
गण्यं चाग्र्यमग्निहोत्रनिरतैः स्त्रीभिः परम् ॥
वेदाध्यायपरायणैश्च बटुभिर्विद्वद्भिरापूरितं
क्षेत्रं दिव्यपवित्रमार्षनिलयं सन्दर्शनीयं सभैः ॥ ४

॥ पूर्वं श्रीपाद श्रीवल्लभ स्वामिनां गोकर्णं प्रति आगमनम्

"श्रीपादः स यतीश्वरः श्रुतिपरः श्रीवल्लभो योगिराट्
श्रीरुद्रं समुपासितुं सुमनसा श्रद्धामयो मौनिराट् ।
आत्रेयाद्यवतारसत्त्वपुरुषः प्रज्ञानसच्चक्षुषा
गोकर्णं प्रति योगसत्त्ववपुषा सम्प्राप्त दिव्यार्चिषा ।

" गोकर्णे श्रीपाद स्वामिनां वर्षत्रयं तपश्चरणम् ॥
ततः कृष्णातीरस्थं कुरवपुरं प्रतिगमनम् ।

"क्षेत्रेऽस्मिन् सतपश्चचार मनसा धीयोगसत्त्वत्विषा
हृद्योगात् करणत्रयेण महसा सिद्धो बभूवार्चिषा ।
दत्तात्रेय इवापरः स गुरुराड् भूयः प्रसिद्धिं जगौ
द्वीपं तत् कुरवं पुरं सुतपसे कृष्णातटं सञ्जगौ ॥ ३ ॥

॥ साम्प्रतं श्रीवासुदेवानन्द सरस्वती स्वामिनां गोकर्णं प्रति आगमनम् ॥

"तद्वद् वेदविदेव सन् यतिवरो योगीन्द्र एवात्मवान्
दत्तात्रेय सुयोगसत्त्वजनितः श्रीवासुदेवाभिधः ॥
गोकर्णं स समागमत् सुमनसा श्रीशालिवाहे शके
(१८३१) श्रीभूरामदिगिन्दुसन्मितगुणे साधारणे ह्यायने ॥ ४ ॥
सितेऽ… चान्द्रमासि वै
८ पुष्ये मासि श्रीपौर्णिमास्यां तिथौ (सोमवासरे)
दत्तात्रेयगुरोरुपादिशदयं तं द्वादशार्णं मनुम् ।
दीक्षादानमुखेन मेऽभ्युदयदं निःश्रेयसैकास्पदं
दत्त्वा सोऽयमभूत् स्वयं मम गुरुः श्रीवासुदेवो यतिः ॥
॥ ८ ॥

३

श्रीदत्तात्रेयस्य वैदिकतत्त्वोपदेशः वेदसभायाम् ॥

९ ॥ आत्रेयस्य सुदिव्य तत्त्वगुणतः सा ध्येयकं वैदिकं
सोऽत्रैवादिश दा कसाकरणतः श्रद्धास्पदं दैविकम् ॥
आत्रेयो मुनिरात्मनस्त्रिकरणैः सन्मन्त्रदृक् सन्दृशां
सोऽत्रैवाभ्युदितः स्वयं त्रिगुणतः सर्वान्तरोऽन्तर्दृशा ॥ ९ ॥

१० ॥ मध्ये वान्तरितं सुबीजममृतं गुह्यं समुह्यं विदा
सत्त्वेनाङ्कुरितं निरन्तरभृतं तत् सन्धृतं मे हृदा ॥
श्लोकेनाभ्युदितं श्रुति प्राणिहितं गीर्वाणवाणीमयं
सुश्लोकाय हि कल्पतां त्रिभुवने सद्गौरवं सन्मयम् ॥ १० ॥

११ ॥ नैतत् पूर्वमिह श्रुतं परतमं तत्त्वं सदासीदिदं
नैवं सर्वमितः परं श्रुतिमतं श्रोतुं सुलभ्यं पुनः ॥
सम्प्रत्येव समाश्रुतं भगवतः श्री वासुदेवाद् यतेः
सत्सं संविदितं गुरोः श्रुतिमुखाद् भाग्यादपूर्वं श्रुतेः ॥ ११ ॥

१२ ॥ लोकानां परसंविदाऽभ्युदयदं प्राप्यञ्जिके भुक्तिदं
स्वालोकाय महः पदं प्रभवतात् संसारमार्थप्रदम् ॥
नीतं स्वात्मनि वेदमन्त्रवचसा लेकेऽत्र मा भूद् वृथा
गीतं तद् हृदि देवरात मनसा लेलायतां सर्वथा ॥ १२ ॥

॥ अत्र अन्तिमोऽयमुपसंहारश्लोकः ॥

॥ अग्निरत्रिवृक्कतोऽत्र सोऽयमत्रिरिज्यते
योऽत्रिजो भवानृषिः परः कुमार उच्यते ॥
दैवतेन्द्रवैद्युतोऽग्निरत्रिरेव मिद्ध्यते
दैवरातवाङ्मुखोऽत्रिरग्निरासमिद्ध्यते ॥ १ ॥

॥ ईं ॐ श्रीः ॥

"ॐ भद्रं नो अपि वातय मनः॥

"वैदिकं दत्तात्रेयतत्त्वम्"

(१) अथ प्रथमा कला ॥

१ "भौमोऽत्रिस्त्रिवृदेकपात् स्वयमजः सन् त्वसन्भूः पूरुषः
सोऽग्निर्विश्वभुगेव सन् पर ऋषिर्द्रष्टाऽत्र सोऽयं(?)हाऽऽर्चिषः
तच्छक्तिर्यदनित्यसूयति चिता माताऽनसूयाऽऽर्चिषी
स्वात्रेयः स कुमार आदिमचिते रातिर्नभूवार्चिषा ॥ १ ॥

दत्तात्रेयस्य माता सती अनसूया ॥

२ "माता सेयमसूयया विरहिता सौम्यस्वभावोन्नता
मात्री मानवती गुणेन महता सर्वस्वमानान्विता ॥
साऽत्रे रत्रिवृता बलेन बृहता सत्त्वैकचिन्तोदिता
ज्योतिर्भिस्त्रिवृतं सुतं जनयितुं शक्ताऽनसूया मता ॥ २ ॥

३ "अत्रिः सोऽप्यनसूयया समधिया स्वात्मानुरूपा ह्यया
शक्त्या बद्धहुभावतत्त्वपरया सत्त्वैकभावाढ्यया ॥
तस्यात्रेः स कुमार आदिमसुतस्तत्त्वत्रयात्मोर्जितः
शक्तः सं स्त्रिवृदात्मकः समुदगाऽऽज्योतिस्त्रयेणार्चिषि ॥ ३ ॥

४ "अत्रेर्दीप्तसुदीर्घदिव्यतपसा चिद्योगशक्त्योर्जिताद्
आदित्सात् त्रिवृदग्निरूपकतनूर्जज्ञे भवान् भर्गजाव्"
आत्रेयः स कुमार आर्षमहसा सन् मन्त्रदृक् सन्दृशा
दत्तात्रेय इति प्रसिद्धिमुदगात् त्रैमूर्तिशक्त्या दृशा ॥ ४ ॥

स्वयं

५ "यो जातस्त्रिवृदग्निरूपकचिते: सोऽत्रे: कुमार: यात्॥
" स्वीयं जन्म ददर्श तात्त्विकदृशा शास्त्रात् स्वसत्त्वान्व
हृद्योगेन भवान योनिजतनूत्रद्धमन्त्रवाचाऽऽर्षया।
हृद्यं श्रावयति स्वमानमुखतो हृद्यं निजान्तर्दृशा॥५॥
२
६ "योगात् सोऽहमपरस्य मात्मजननं चित्संविदाऽऽह्मानन्नं
स्वाविर्भूतनिजस्वरूपमननं जागर्ति सत्त्वायनम्॥
यज्ञेनेन्द्रपरेण युक्ततपसा प्रज्ञानसत्त्वोदयाद्
यज्ञीयोऽग्निरयं त्रिवृत् स्वमहसा सत्त्वानुरूपान्वयात्॥"
२

॥अस्मिन्नर्थे विश्वामित्रस्योदाहरणम्॥

२

(१) "अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्॥
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मिनाम॥
२ (विश्वामित्र: ऋक्.मं. ३। ।)
"त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम्॥
२ (साम.
(२) "तुभ्येदमिन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि॥
(जमदग्नि: ऋक् १०।१६७।१)
२
७ "विश्वामित्र ऋषि: सुदिव्यतपसा जज्ञात वेदा: स्वयं
विश्वात्मा भुवि जन्मना समुदितो हि सोऽग्निरस्मीत्ययम्
ज्योतिष्मान् जमदग्निना प्रमुदितो वाचा च तद्दत्तया
तद्योगात् परमिन्द्रमभ्युपगतौ तौ साकमिन्द्रप्रियौ॥७
२

" त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ॥
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाऽ
आथर्वणो बृहद्दिवः । ऋक्. १०।१२०।३) याथ्वीः

२

८ "इन्द्र त्वन्निरता स्तादिन्द्रिययुताः स्वीयानुभावापकं
यत्नं स्वं प्रति वृञ्जते क्रतुमयं संवित्क्रियारूपकम् ॥
सर्वे ते द्वितयानुरूपकलया शक्त्याऽऽत्मभावान्वयं
त्रेधा भावयुता भवन्ति तदुधा वृक्षा प्रभावास्त्वयम् ॥
॥ ८ ॥

२

॥ अथ कुमारस्य आत्रेयस्य मन्त्रदर्शनम्
तथा च सर्वानुक्रमसूत्रम् ॥
" अत्रोद्धि द्वादश- नुधागातेऽक्तिरे "कुमारं कुमारो वृशोवा
जानः अभौ वा शाक्त्यन्तम् । कं वीत्यृचो वृश एव," इति ॥
" कुमारं माता " इति द्वादशार्चं सूक्तम् । कुमारः आत्रेयः
वृशो वा जानः, अभौ वा ऋषी । "कमेतं त्वं ऽयोति वा इस
वृश एव ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । अन्याः
(ऋ० मं० ५ । २ । १-१२)

२

॥ अथ प्रथमो मन्त्रः ॥

२

" कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ॥
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ

२

९ - " माता ह्यस्य कुमार मत्र युवति श्रियस्योदितं स्वात्मजं
पित्रे नैव ददाति गुप्तभवनौ दिव्याग्नितेजोऽभिजम् ॥
अस्यानीकमिदु स्वरूपममृतं पश्यन्ति नेमे जनाः
शंसन्तीह पुरः स्थितं, ह्यमनसोऽपश्यन्त एवात्मनः ॥ ९५
हिंसन्तीह पुरः स्थितं

२

आत्रेयस्य कुमारस्य आत्मनः प्रादुर्भाव साक्षात्कारः ॥

३० " आत्रेयः स कुमार आन्तरदृशा भूमेररण्याश्रितेः
प्रादुर्भूतमिहाग्निमीशसदृशं भौमं प्रगेति श्रुतेः ॥
अध्यात्मं ह्यपरोक्षसत्त्वकदृशं तं जातवेदात्मकं
स्वात्मानं स कुमार आत्मनि विदन् सस्मार भूमात्मकम् ॥३०॥

तत्त्वत्रय योगेन वेदार्थ समर्थनम् शास्त्रीयम् ॥

पञ्चधा अर्थः दैवरातसमर्थितः ॥

३१ " वेदार्थेऽखिलवेदमन्त्रवचने तत्त्वत्रयेणान्वयः
वेद्योऽर्थस्त्रिविधो मतोऽत्र विदुषां सत्त्वास्त्रदृष्ट्याऽन्वयः ॥
शब्दार्थः प्रथमः स शास्त्रविहितस्तत्त्वैस्त्रिभिः स्यात् त्रिधा
तत्त्वैक्यादिह पञ्चमोऽप्यभिहितः सन् दैवरातोदितः ॥३१॥ +:

॥आग्नेयेन तेजसा भौम शरीराविर्भावे क्रमः॥

" अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे। गर्भे सञ्जायसे पुनः ॥
(विरूपः आङ्गिरसः ॥ (ऋक्. मं. ८।४३।९)

"अप्स्वग्ने" तव मूलसांस्थितिपदं तद् वैद्युतज्योतिषः
सत्त्वं सम्प्रविशस्यतोऽवनिपदं सन्त्वोषधीः स्वार्चिषा ॥
सोऽन्नेनापि सुवीर्यतोऽत्र पुरुषाद् दिव्याहितः सोऽसुमान्
गर्भे संस्कृतितः सचेतनतनूः सञ्जायसे चित्तिमान् ॥ ३२ ॥

॥ कुमारस्यात्रेयस्य तदनुभावानुवचनम् ॥

३४. " अध्यात्मं स कुमार आत्ममहसा भौमात्मनोऽग्नेराश्रिता
सञ्जातः पृथिवीतले स्वतपसा सिद्धो धियां योगतः ॥
स्वाविर्भूतनिजस्वरूपमनसा सञ्जातवेदाः स्वयं ॥
सत्यात्मन्यनुभावमन्त्रवचसा प्रोवाच स स्वान्वयम् ॥ ३४॥

३५ "सत्त्वान्मन्त्रदृगेव सन् भुवि नरर्षिर्जातः कुमारः स्वकं
तत्त्वं संविदितं ततः समुदितं तत्स्वानुभावात्मकम् ॥
तत्त्वार्थात् परमार्थतः प्रमुदितं पूर्णप्रभावात्मकं
तस्मिन् स्वार्षसुवेदमन्त्रनिचितं स्तौति स्वभावात्मकम् ॥ ३५ ॥

३६ " संसिद्धं पुरुषे सुवीर्यममृतं तद्गर्भिणीष्वाहितं
सद्योजातमिवैव रुद्रमहसं स्वं दिव्यदृष्ट्याऽऽहितम् ॥
वाच्यं छान्दसवेदमन्त्रवचसं स्वेद्धाग्नितेजोमुखं
वेद्यं तं त्रिवृतं विवेद सहसा योगात् त्रयीसन्मुखम् ॥ ३६ ॥

॥ आत्रेयस्य कुमारस्य तत्त्वत्रयभेदेन स्वरूपसमर्थनम्

(१)
३२ "भौमाग्नेः सकुमार आविरुदितः सन् भौतिकोऽग्निर्हितः
(२)
भूमात्मा दिवि दिव्य एव पुरुषः सूर्योऽधिदैवः स्तुतः ॥
आन्तर्योऽत्र सचेतनः स तनुभृद् वैश्वानरात्माऽन्तरात्
(३)
प्रत्यज्ज्यन्तरितः स्वधीन्द्रियपराद् आध्यात्मिकोऽग्निः स्वयम् ॥ ३२

॥ तद्दर्शनात् आत्रेयस्य वृशस्य ऋषेरनुवचनम् "

३७ "दृष्ट्वा तं पुनरूर्जितं निजदृशा जानो वृशः सन्दृशा
दृष्टं दिव्यमहः सुपूर्णपुरुषं तं स्तौति मन्त्रैर्ऋचा ॥
जातं स्वं च कुमारमग्निवपुषं गुप्तं पृथिव्यां हितं
यज्ञे मन्त्रमुखेन सत्त्वमथनात् सूर्यादिरण्योः सृतम् ॥ ३७ ॥

॥ तथा च ताण्ड्य-ब्राह्मणवचनम् ॥ शाट्यायनकं च ।

१८ " ताण्ड्ये तत्त्वपरेतिहासवचनं शाट्यायने ब्राह्मणे
माण्डव्येन महात्मनाऽनुवचनं संश्रावितं ब्रह्मणे ॥
प्राज्ञास्तद् विमृशन्तु तात्त्विकदृशा प्रत्यक्षसत्त्वोदये
प्रज्ञानेन दिशन्तु सत्यवचसा साक्षात्कृतेः स्वोदये ॥ १८ ॥

॥ शाट्यायनब्राह्मणवचनम् ॥

॥ अस्मिन्नर्थे ऐतिहासिकं सङ्केतार्थतत्त्वम् ॥

१९ - " केचित् तत्र परेतिहासपरकं सद्रूपकं दूचिरे
तस्मिन्नन्तरितं स्वसंविदुदितं तत्त्वार्थकं मेनिरे ॥
सङ्केतार्थकवेदमन्त्रवचनं सच्छास्त्रदृष्ट्या समं
सत्येनैव विमृश्यतां समधिया सङ्गृह्यतां सत्तमम् ॥ १९ ॥

" इतिहासः तत्त्वार्थबोधपरः

२० " तत्त्वार्थेष्वितिहासकल्पकमिदं सद्रोचकं रूपकं
तथ्येन प्रतिसंविदेऽन्वयपदं प्रज्ञाप्रतिष्ठापकम् ॥
तुष्यन्तीह जनाः सुरस्यकथया मत्वा मनोरञ्जकं
सुज्ञास्तत्र विदन्ति सत्यपरया विन्दन्ति सत्सञ्जकम् ॥ २० ॥

॥ कुमारस्य आत्रेयस्य तात्त्विकार्य विषये इतिहासकल्पना
स्य

२३ " ऐक्ष्वाक ~~स्य~~ रुणो बभूव नृपति स्त्रैवृष्णनामाऽऽश्रुतेः
आसीत् तस्य पुरोहितो द्विजवरो जानो वृशः सन्नृषिः ॥
राज्ञस्तस्य रथस्य चक्र विगते रन्ध्रैः कुमारो हतः
तस्मिन्नप्युभयो स्तयो रनुचित वृत्तोऽपराधोऽहितः ॥२३॥

॥ वार्षेन साम्ना जानो वृशः कुमारस्य तस्य सञ्जीवनं चकार ॥ (वृ...

॥ ताभ्यां तं कुमारं तत्पितृभ्यां सन्दत्तः। तस्माद् दत्तात्रेय इति स...

२२ " राज्ञेऽहः स तु सारथिः शुभगुणौ जानो वृशो ब्राह्मणः
साम्ना तं समजीवयत् स्वरगुणैः वार्षेन सद्ब्रह्मणा ॥
दिक्षा तत्र मृतः पुनः प्रजनितो दत्तः पितृभ्यां ततो
"दत्तात्रेय" इति प्रसिद्धिमुदगात् सोऽयं कुमारः स्वतः ॥ २२ ॥